# sarvasiddhipradaM puShTipatistotram

# સર્વસિદ્ધિપ્રદં પુષ્ટિપતિસ્તોત્રમ્

## Document Information

Text title : sarvasiddhipradaM puShTipatistotram

File name : sarvasiddhipradaMpuShTipatistotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa

Latest update : September 16, 2004, July 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# સર્વસિદ્ધિપ્રદં પુષ્ટિપતિસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
રાધાકૃષ્ણાવૂચતુઃ ।
પુષ્ટિપતે નમસ્તુભ્યં નમઃ શઙ્કરસૂનવે ।
બ્રહ્મભૂતાય દેવાય સર્વસિદ્ધિપ્રદાય તે ॥ ૧॥

સ્વાનન્દવાસિને તુભ્યં બ્રહ્મપુત્રાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તે વૈ ગણેશાય નમો નમઃ ॥ ૨॥

હેરમ્બાય નમસ્તુભ્યં નમો યોગમયાય ચ ।
સર્વાદયે ચ સર્વેશ સર્વજ્ઞાય નમો નમઃ ॥ ૩॥

નિર્ગુણાય નમસ્તુભ્યં સગુણાય નમો નમઃ ।
ગજાનનાય વૈ તુભ્યમભેદાય નમો નમઃ ॥ ૪॥

શાન્તિરૂપાય શાન્તાય શાન્તિદાય મહોદર ।
મૂષકવાહનાયૈવ ગાણપત્યપ્રિયાય તે ॥ ૫॥

અનન્તાનન્તરૂપાય ભક્તસંરક્ષણાય ચ ।
ભક્તિપ્રિયાય દેવાય ભક્ત્યધીનાય તે નમઃ ॥ ૬॥

ચતુર્બાહુધરાયૈવ નાગયજ્ઞોપવીતિને ।
શૂર્પકર્ણાય શૂરાય પરશુધર તે નમઃ ॥ ૭॥

વિષ્ણુપુત્રાય સર્વેષાં પિત્રે માત્રે નમો નમઃ ।
વિનાયકાય વિપ્રાણાં પુત્રાય તે નમો નમઃ ॥ ૮॥

સર્વેષાં ગર્વહન્ત્રે ચ સર્વેભ્યઃ સુખદાય તે ।
લમ્બોદરાય વિઘ્નેશ બ્રહ્મનાયક તે નમઃ ॥ ૯॥

કિમ્ સ્તુવસ્ત્વાં ગણાધીશ યત્ર વેદાદયઃ પ્રભો ।
શુકશમ્ભ્વાદયશ્ચૈવ બભૂવુઃ કુણ્ઠિતાઃ પરમ્ ॥ ૧૦॥

આવાં ગર્વયુતૌ જાતૌ બ્રહ્માકારૌ વૃથા પ્રભો ।
તત્ર ત્વયા ચ વિઘ્નેન કૃતં ગર્વસ્ય ખણ્ડનમ્ ॥ ૧૧॥

સાધૂનાં વિઘ્નહર્તા ત્વં શાન્તિયોગાર્થમઞ્જસા ।
અસાધૂનાં વિનાશાય હ્યતસ્ત્વાં પ્રણમામહે ॥ ૧૨॥

વિઘ્નયુક્તતયા ઢુણ્ઢે આવાભ્યાં યોગસેવયા ।
સાક્ષાત્કારઃ કૃતસ્ત્વં વૈ સમીચીનમિદં કૃતમ્ ॥ ૧૩॥

હૃદિ ચિન્તામણિં ત્વાં ચ પશ્યાવઃ સતતં પ્રભો ।
અતઃ સુશુભદો વિઘ્નઃ સઞ્જાતો નો ગજાનન ॥ ૧૪॥

અધુના દેહિ વિઘ્નેશ ભક્તિં તે ચરણામ્બુજે ।
દૃઢાં યયા ચ ગર્વેણ ન ભવાવઃ સમાયુતૌ ॥ ૧૫॥

ઇત્યુક્ત્વા તં પ્રણમ્યૈવ નનૃતતુર્મુદાન્વિતૌ ।
ધન્યૌ પ્રબ્રુવતૌ ધન્યૌ દર્શનાદ્ગણપસ્ય તૌ ॥ ૧૬॥

બ્રહ્મોવાચ ।
તતસ્તૌ ગણનાથો વૈ જગાદ ભક્તિભાવતઃ ।
દૃષ્ટ્વા પ્રેમરસાહ્લાદયુક્તૌ રાધાજનાર્દનૌ ॥ ૧૭॥

શ્રીપુષ્ટિપતિરુવાચ ।
ભો રાધે કૃષ્ણ મે વાક્યં શ ृણુતં જગદીશ્વરૌ ।
મદીયાં ભક્તિમત્યન્તં કરિષ્યેથે ન સંશયઃ ॥ ૧૮॥

સઙ્કટે સ્મરણેનૈવ પ્રકટઃ સમ્ભવામ્યહમ્ ।
યં યમિચ્છથ આનન્દં સફલં તં ભવિષ્યતિ ॥ ૧૯॥

ભવત્કૃતમિદં સ્તોત્રં પઠનાચ્છ્રવણાન્નૃણામ્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ સુરેશ્વરૌ ॥ ૨૦॥

મત્પ્રીતિવર્ધનં નિત્યં વાઞ્છિતાર્થકરં ભવેત્ ।
અન્તે સ્વાનન્દદં કૃષ્ણ ભવિષ્યતિ ન સંશયઃ ॥ ૨૧॥

ઇતિ મૌદ્ગલે પુષ્ટિપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*sarvasiddhipradaM puShTipatistotram*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*